नं० ४८३८— ब

स्थालीपाक प्रयोगः (पूर्ण)

पत्राणि ११

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४७३७-घ

स्थालीपाकप्रयोगः (पूर्ण)

नं० ५७२७ - घ
पत्राणि ११

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

॥१॥ श्रीगणेशाय नमः॥ यज्ञपुरुषाय नमः॥ अथ स्थालीपाक लिख्यते॥ आचम्य प्रा
णानायम्य पवित्रे धृत्वा देशकालौ संकीर्त्य ममोपात्तदुरितक्षयद्वारा श्रीपरमे-
श्वरप्रीत्यर्थं पौर्णमासस्थालीपाके नयक्ष्ये॥ दर्शे तु दर्शस्थालीपाके नयक्ष्ये॥ अ
ग्निमुपसमिध्य॥ चत्वारिशृंगेति वामदेवोग्निस्त्रिष्टुप्॥ अग्निमूर्त्तिध्याने विः॥ ॐ च
त्वारिशृंगा त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य॥ त्रिधा बद्धो वृषभो रोरवीति
महोदेवो मर्त्यां आविवेश॥ सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः॥ त्रिपात्प्रसन्न
वदनः सुखासीनः शुचिस्मितः॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा॥ बिभ्रद्द
क्षिणहस्ते तु शक्तिमन्नं स्रुचं स्रुवं॥ तोमरं व्यजनं वामे घृतपात्रं च धारयन्॥ आ- ॥१॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्माभिमुखमासीनएवंरूपोहुताशनः॥एषहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातः
सउगर्भेअंतः॥सविजायमानःसजनिष्यमाणःप्रत्यङ्मुखास्तिष्ठतुविश्वतोमुखः
अग्नेवैश्वानरशांडिल्यगोत्रमेषध्वजप्राङ्मुखोग्निममसन्मुखोभव॥समिद्ध्यमानस्य
क्रियमाणेपौर्णमासस्थालीपाकहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥दर्शस्था-
लीपाकहोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥इतिसंकल्प्य॥अस्मिन्नन्वाहिते
ग्नौजातवेदसमग्निमिध्मेनप्रजापतिंप्रजापतिंचाघारदेवतेआज्येनाग्नीषोमौच
क्षुषीआज्येनात्रप्रधानंअग्निंअग्नीषोमौचप्रधानदेवतेचरुद्रव्येण॥दर्शेत्वग्निमिंद्रा
ग्नीचप्रधानदेवतेचरुद्रव्येण॥शेषेणस्विष्टकृतमग्निमिध्मसंनहनेनरुद्रंअयासम

© Dharmartha Trust J&K. Digitized by eGangotri

॥२॥ ग्निं देवान्विष्णुं अग्निं वायुं सूर्यं प्रजापतिं च एताः॥ आर्ये सदेवता आज्यद्रव्येणाज्ञाता
ज्ञातदोषनिवर्हणार्थं अग्निं ३ मरुतश्चाज्येन अंगदेवताः प्रधानदेवताः सर्वाः सन्निहि
ताः संतु एवं सांगोपांगेन कर्मणा सद्यो यक्ष्ये॥ व्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृ
हती अन्वाधानसमिद्धोमे वि॰॥ ॐ भूर्भुवः स्वः स्वाहा॥ प्रजापतय इदं न ममेति त्यागः॥ इ
ध्मा बर्हिषो श्च सन्नहनं अनधो निदध्यात्॥ परिस्तरणार्थं षोडशादर्भैः सह आयतन
स्य पश्चाद्भागे उपरि निदध्यात्॥ ईशानीदिशमारभ्य ईशानी पर्यन्तं प्रदक्षिणं सोदकेन
पाणिना त्रिः परिसमूहनं॥ परिस्तरणं प्राच्यामुदगग्रैर्दक्षिणस्यां प्रागग्रैः प्रतीच्यामुद
गग्रैरुदीच्यां प्रागग्रैर्दर्भैः परिस्तरणीयात्॥ पूर्वपश्चिमपरिस्तरणमूलयोरुपरि दक्षिण ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

परिस्तरणं॥पूर्वपश्चिमपरिस्तरणाग्रयोरधस्तादुत्तरपरिस्तरणं॥इध्मं दक्षिणेग्निं परिस्तीर्य

अग्नेर्दक्षिणतो ब्रह्मासनार्थं॥ अग्नेरुत्तरतश्च पात्रासादनार्थं दर्भान्प्रागग्रानास्ती

र्य॥अग्नेरीशानीमारभ्य पूर्ववत् निर्युक्ष्य॥अग्नेरुत्तरतः पूर्वमास्तीर्णदर्भेषु दक्षिण

सव्यपाणिभ्यां क्रमेण चरुस्थाली प्रोक्षिण्यौ॥दर्वीस्रुवौ॥प्रणीताज्यपात्रे इध्माव

र्हिषि स्फ्यं कृष्णाजिनं उलूखलमुसलं चेति॥द्वे द्वे उदगपवर्गं प्राक्संस्थं च न्युब्जान्या

सादयेत्॥पवित्रे कृत्वा समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कुरुते॥तृणं का

ष्ठं वांतर्धायच्छिनत्ति न नखेन॥ अपउपस्पृश्य॥आदौ प्रोक्षणीं त्रिः प्रोक्षति॥प्रोक्षणी

पात्रमुत्तानं कृत्वा॥तत्रानंतर्गर्भितिप्रादेशमात्रकुशद्वयरूपे पवित्रे निधाय॥शुद्धा

© Dharmartha Trust J&K. Digitized by eGangotri

सिरद्भिः पूरयित्वा ॥ अंगुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां ते पवित्रे उदगग्रे अ
संसृष्टे गृहीत्वा ॥ सूक्ष्मा त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा ॥ इध्मं च विस्रस्य सर्वाणि पा
त्राणि त्रिः प्रोक्षयेत् ॥ ततस्ते पवित्रे गृहीत्वा अन्यैर्दर्भैराच्छादयेत् ॥ ते पवित्रे प्रणीता
पात्रे निधाय ॥ अग्नेः पश्चात्प्रणीतापात्रं निधाय ॥ उदकं पूरयित्वा ॥ पूर्वमुत्पूताभिरद्भिः पू
रयित्वा ॥ गंधपुष्पाक्षतानि निक्षिप्य ॥ ततो ब्रह्मावरणं ॥ ईशानदिग्व्यवस्थितं विप्रं अस्मिन्कर्म- नं ।
णि ब्रह्मत्वेन त्वामहं वृणे ॥ पाणिना पाणिं स्पृष्ट्वा ॥ ततो ब्रह्मा वृतो स्मीत्युक्त्वा प्राङ्मुखो य
ज्ञोपवीत्याचम्य समस्तपाण्यंगुष्ठो भूत्वा ग्रेणाग्निं परीत्य अग्नेर्दक्षिणतं उदङ्मुखः स्थि
त्वा ॥ पूर्वमासनार्थं निहितदर्भेषु दक्षिणभागस्थितमेकं दर्भं अंगुष्ठानामिकाभ्यां गृही

© Dharmartha Trust J&K. Digitized by eGangotri

त्वा निरस्तः परावसुः ॥ इति मंत्रेण निर्स्त्यं निरस्य ॥ अप उपस्पृश्य ॥ इदमहमर्वाव
सोः सदने सीदामि ॥ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते ॥ बृहस्पते यज्ञं गोपाय ॥ इ
ति जपित्वा ॥ यज्ञावेक्षणे रतो भूयात् ॥ आचार्यः प्रणीतापात्रं मुखसममुद्धृत्य ब्रह्मन्
पः प्रणेष्यामि ॥ ब्रह्मा ॐ भूर्भुवः स्व बृहस्पतिप्रसूतः उच्चैराह ॐ प्रणय ॥ इति प्रणीता
पात्रमग्नेरुत्तरतो दर्भेषु निधाय ॥ ते पवित्रे गृहीत्वा ॥ अन्यैर्दर्भैराच्छादयेत् ॥ अग्नेः पश्चा
च्छूर्पं निधाय ॥ ते पवित्रे प्रागग्रे शूर्पे निधाय ॥ अग्नये त्वा जुष्टं निर्वपामि इति मंत्रावृत्या चतु
रः स्वस्तरो मुष्टीन्निरूप्य ॥ अग्नीषोमाभ्यां त्वा जुष्टं निर्वपामि ॥ तथैव निरूप्य ॥ ते पवित्रे व्री
हीणामुपरि निधाय ॥ उत्पूताभिरद्भिः ॥ अग्नये त्वा जुष्टं प्रोक्षामि ॥ निर्वापसंख्यया प्रोक्षयेत्

© Dharmartha Trust J&K. Digitized by eGangotri

॥४॥ अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि तथैव प्रोक्षयेत्॥ दर्शे त्वग्नीषोमस्थाने इंद्राग्निभ्यां त्वेत्या
दिभिर्निर्वापे प्रोक्षणे च विशेषः॥ पात्राणामुत्तरतः॥ प्राग्ग्रीवमूर्ध्वलोम कृष्णाजिनमुलूख
लं निधाय॥ उलूखले व्रीहीन्निरुप्य॥ तान् मुसलेन पत्न्या अवहत्य॥ त्रिः फलीकृत्य त्रिः प्र
क्षाल्य चरुं सुश्रृतं पचेत्॥ ततस्ते पवित्रे गृहीत्वा आज्यपात्रे निधाय॥ आज्यपात्रं पुरतः
संस्थाप्य विलीनाज्यं निक्षिप्य अग्नेरुत्तरतः स्थितानंगारान् भस्मना सह॥ अग्नेरुदक्प
रिस्तरणाद् बहिर्निष्काश्य तदुपर्याज्यपात्रं निधाय॥ ज्वलता दर्भोल्मुकेनावज्वल्य॥ अंगुष्ठ
पर्वमात्रप्रक्षालितदर्भाग्रद्वयमाज्ये निधाय॥ पुनर्ज्वलता दर्भोल्मुकेन चरुणा सहाज्यं त्रिः
पर्यग्निकृत्वा॥ तदुल्मुकमपास्यापः स्पृष्ट्वा॥ आज्यस्थालीं भुवि कर्षन्निव गृह्यासग्न॥ अंगा ॥४॥

© Dharmartha Trust J&K. Digitized by eGangotri

रान् प्रसज्यापरस्य कृत्वा ॥ तत्रस्थितमेवाज्यं सवितुष्ट्वेति मंत्रस्य हिरण्यस्तूप ऋषिः सवि-
तादेवता ॥ पुरउष्णिक् छंदः ॥ आज्यस्योत्पवने विनियोगः ॥ ॐ सवितुष्ट्वा प्रसव उत्पु-
नाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥ प्रागुत्पुनाति सकृन्मंत्रेण द्विस्तूष्णीं
ते पवित्रे अद्भिः प्रोक्ष्याऽग्नौ प्रहरेत् ॥ स्कंदाय स्वाहेति केचित् ॥ स्कंदायेदं ॥ अग्नेयं पश्चात्प-
रिस्तरणाद्बर्हिः आत्मनोऽग्रे भुवं प्रोक्ष्य ॥ भुवि बर्हिः सन्नहनीं रज्जुमुदगग्रां वितत्य तद्ब-
र्हिः प्रागग्रमुदगपवर्गं निविडमास्तार्य ॥ तदुपर्याज्यपात्रं निधाय ॥ दक्षिणहस्तेन स्रुक्स्रु-
वौ गृहीत्वा सव्येन कांश्चिद्दर्भानादाय ॥ सहैवाग्नौ प्रताप्य दर्वीं निधाय ॥ दक्षिणहस्ते स्रु-
वं वामहस्ते गृहीत्वा ॥ कुशांश्च दक्षिणहस्तेन गृहीत्वा ॥ स्रुवाविलं दर्भाग्रैः प्राग्दक्षिणेना-

© Dharmartha Trust J&K. Digitized by eGangotri

॥५॥

प्रागादि प्रागपवर्गं त्रिः संमृज्य॥ स्रुवाधस्ताद्दर्भाग्रैरभ्यात्मं बिलदृष्ट्वं त्रिः संमृज्य॥ दर्भमूलैः
स्रुवदंडाधस्ताद्बिलदृष्ट्वा दारभ्य यावदुपरि बिलं तावत्त्रिः संमृज्य॥ प्रोक्ष्य प्रताप्य घृतादु
त्तरतः स्थापयेत्॥ अप उपस्पृश्य॥ तैरेव दर्भैर्दर्वीं तद्वदेव संमृज्य प्रोक्ष्य॥ प्रताप्य स्रुवादुत्तरतः
स्थापयेत्॥ अप उपस्पृश्य॥ ॥ संमार्गान्दर्भान्प्रोक्ष्याग्नौ प्रहरेत्॥ स्रुवेणाज्यं गृही
त्वाश्रुतं चरुमभिघार्य॥ चरुस्थालीमुद्गृह्यास्याग्न्याज्ययोर्मध्येन नीत्वाज्याद्दक्षिणतो
बर्हिषि एकादशांगुलमितेऽदेशे सांतरमासाद्य॥ पुनश्चरुमभिघार्येन वाभिघार्य॥ तन्मध्ये
एकं पात्रं निधाय॥ अग्निमलंकृत्य॥ गंधपुष्पैरग्निमभ्यर्चयेत्॥ विश्वानि न इतिति सृणामा
त्रेयो वसुश्रुतो त्रिष्टुप्छंदः स्याम र्चनेंस्ययोपस्थाने विनियोगः॥ ॐ विश्वानि नो दुर्गहा ॥५॥

© Dharmartha Trust J&K. Digitized by eGangotri

जातवेदः ॥ ॐ सिंधुंन नावा दुरितातिपर्षि ॥ ॐ अग्ने अत्रिवन्नमसा गृणानः ॥ ॐ अस्माकं बो
ध्यविता तनूनां ॥ ॐ यस्त्वा हृदा कीरिणा मन्यमानः ॥ ॐ अमर्त्यं मर्त्यो जोहवीमि ॥ ॐ जा
तवेदो यशो अस्मासु धेहि ॥ ॐ प्रजाभिरग्ने अमृतत्वमश्यां ॥ प्रतिपादं प्रतिदिशं प्राचीमा
रभ्य समभ्यर्च्य ॥ ॐ यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं ॥ अश्विनं स पुत्रिणं वी
रवंतं गोमंतं रयिं नशते स्वस्ति ॥ इत्युपस्थाय ॥ आत्मानं चालंकृत्य हस्तं प्रक्षाल्य ॥ इध्म
बंधनरज्जुं तत्रैव निधाय ॥ दक्षिणपाणिनेध्ममादाय त्रिरिध्ममभिघार्य ॥ मूलमध्याग्र
मूलमध्ययोर्मध्यभागे गृहीत्वा ॥ अयं त इध्म इत्यस्य वामदेवो जातवेदाग्निस्त्रिष्टुप् ॥ इध्माह
वने विनियोगः ॥ ॐ अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चेद्ध वर्द्धय चास्मान्प्र

© Dharmartha Trust J&K. Digitized by eGangotri

॥६॥ अयाप्यशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहा॥ऽग्नयेजातवेदसइदंनमम॥स्रुवेणाज्यं

५२ गृहीत्वापरिस्तरणेकोणेवायव्यकोणतंआग्नेयीपर्यंतंप्रजापतयेतिमनसास्मरन्स्वाहे

त्युच्चार्य॥तथैवानिर्ऋतिदिशिमारभ्यऐशानीपर्यंतंजुहुयात्॥उभयत्रप्रजापतयइदंनम

6 मेतित्यागः॥पुनराज्यंगृहीत्वा॥अग्नयेस्वाहाउत्तरतः॥अग्नयइदं॥पुनराज्यंगृहीत्वासोमाय

स्वाहेतिदक्षिणतः॥सोमायेदं॥सांगतासिध्यर्थंसर्वप्रायश्चित्तंकरिष्ये॥ॐभूर्भुवःस्वः

स्वाहाप्रजापतयइदंनमम॥चरुंपूर्वनिहितपात्रांतरेष्टंघृक्ष्य॥इदमग्नयेइदमस्मीबो

मास्यामिति॥इदमग्नयेइदमिंद्राग्निभ्यांचरुभागद्वयमुत्तरसंस्थमभिमृश्य॥स्रुवेणाद

र्वीमुपस्तीर्यप्रथमप्रधानदेवताअंगुष्ठपर्वमात्रंहविरवदाय॥मध्यात्पूर्वार्द्धात्॥हविर ॥६॥

इतिरद्धे

पौर्णमासं २

© Dharmartha Trust J&K. Digitized by eGangotri

पुनर्दर्व्यामुपस्तीर्य॥हविरवदायै॥ॐ अग्निषोमा १

भिघार्य॥दर्वीस्थमभिघार्य॥ॐ अग्नये स्वाहा॥अग्नय इदं न मम॥भ्यां स्वाहा अग्नीषोमा
भ्यामिदं न मम॥दर्शे त्वग्नीषोमस्थाने इंद्राग्निभ्यां स्वाहेति विशेषः॥इंद्राग्निभ्यामिदं न मम
पुनर्दर्व्यामुपस्तीर्य प्रथमहविष उत्तरार्द्धात्पूर्ववदवदानतो भूयो नूचीनाभिरेवांगुलिभि
रवदाय॥दर्व्यामोप्य॥पुनर्द्वितीयहविषस्तथैवावदाय॥पात्रस्थमनभिघार्य दर्वीस्थं
द्विरभिघार्य॥यदस्य कर्मण इत्यस्य मंत्रस्य॥हिरण्यगर्भ ऋषिः॥अग्निः स्विष्टकृद्देव
ता अतिधृतिश्छंदः स्विष्टकृद्धोमे वि०॥ॐ यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाक
रं॥अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे॥अग्नये स्विष्टकृते सुहुतहुते सर्व
प्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्समर्द्धय स्वाहा॥अग्नये स्विष्ट

© Dharmartha Trust J&K. Digitized by eGangotri

॥७॥ कृतइदंनमम॥त्रिसंधानंविस्त्रस्यै॥ ॐ रुद्रायपशुपतयेस्वाहा॥रुद्रायपशुपतयइ
दंनमम॥अपउपस्पृश्य॥ ॥अयाश्चेत्यस्यमंत्रस्यविमदऋषिः॥अयाअग्निर्देवतापङ्
क्तिश्छंदः॥प्रायश्चित्ताज्यहोमेविनियोगः॥ ॐ अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमि
त्वमयाअसि॥अयासावयसाकृतोयासन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा॥अ
ग्नयेअयासइदंनमम॥अतोदेवाइतिद्वयोर्मेधातिथिऋषिः॥आद्यादेवादेवताद्वि
तीयाविष्णुर्देवतागायत्रीछंदः॥प्रायश्चि०॥ ॐ अतोदेवाअवंतुनोयतोविष्णुर्विच
क्रमे॥पृथिव्याःसप्तधामभिःस्वाहादेवेभ्यइदं॥इदंविष्णुर्विचक्रमेत्रेधानिदधे
पदं॥समूढमस्यपांसुरेस्वाहा॥विष्णवइदं॥व्यस्तसमस्तानांव्याहृतीनांविश्वामि ॥७॥

© Dharmartha Trust J&K. Digitized by eGangotri

त्रजमदग्निभरद्वाजभृगवस्त्रषयः॥ अग्निवायुसूर्यप्रजापतयो देवता॥ गायत्र्युष्णिग
नुष्टुप्बृहत्यश्छंदांसि प्रायश्चित्ताज्यहोमे विनियोगः॥ ॐ भूः स्वाहा॥ अग्नय इदं॥ ॐ
भुवः स्वाहा॥ वायव इदं॥ ॐ स्वः स्वाहा॥ सूर्यायेदं॥ ॐ भूर्भुवः स्वः स्वाहा॥ प्रजापत-
य इदं॥ सप्ताज्याहुती र्जुहुयात्॥ ततो ब्रह्मा कर्तारं परीत्य॥ अग्नेर्वायव्यां दिशो तिष्ठन्नेताए
वसप्ताज्याहुती र्हुत्वा॥ त्यागस्तु यैमा नो त्र कुर्यात्॥ यं द्वो देवा अभितपा मरुतः त्रिष्टुप्॥ प्रा
यश्चित्ताज्यहोमे विनि॰॥ ॐ यं द्वो देवा अतिपातयानि वाचा चप्रयुतं देवहेडनं॥ अरापो अ
स्मां अभिदुच्छुनायते न्यत्रास्मिन्मरुतस्तं निधेतन स्वाहा॥ मरुद्भ्य इदं॥ अनाज्ञातमितिमं
त्रद्वयस्य हिरण्यगर्भो ग्निरनुष्टुप्॥ प्रायश्चित्ताज्यहोमे विनियोगः॥ अनाज्ञातं यदाज्ञातं यु

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञस्यक्रियते मिथु ॥ अग्नेस्तदस्य कल्पय त्वं हि वेत्थ यथा तथं स्वाहा ॥ अग्नय इदं ॥ पुरुषसं
मितो यज्ञो यज्ञः पुरुषसंमितः ॥ अग्ने तदस्य कल्पय त्वं हि वेत्थ यथा तथं स्वाहा ॥ अग्नय
इदं ॥ यत्पाकुत्रेत्यास्यास्त्रितोग्निस्त्रिष्टुप् ॥ प्रायश्चित्ते ॥ ॐ यत्पाकत्रा मनसा दीनदक्षा न
यज्ञस्य मन्वते मर्त्यासः ॥ अग्निष्टद्धोता क्रतुविद्विजानन् यजिष्ठो देवाँ ऋतुशो यजाति स्वा
हा ॥ अग्नय इदं ॥ सांगतासिध्यर्थं सर्वप्राय[illegible]श्चित्तसंक ॥ ॐ भूर्भुवः स्वः स्वाहा प्रजापत
य इदं न मम ॥ बर्हिषि पूर्णपात्रं निनयेत् ॥ दक्षिणपाणिनास्य ग्रान् ॥ ॐ पूर्णमसि पूर्णं
मे भूयाः ॥ सुपूर्णमसि सुपूर्णं मे भूयाः ॥ सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः ॥ अक्षि
तिरसि मा मे क्षेष्ठाः इति जपित्वा ॥ कुशाग्रैः प्राच्यादि पंच दिक्षु जलं मंत्रैर्मार्जयेत् ॥ प्राच्यां

॥८॥

© Dharmartha Trust J&K. Digitized by eGangotri

दिशि देवास्त्विजो मार्जयंतां ॥ दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां ॥ प्रतीच्यां दि-
शि ग्रहाः पशवो मार्जयंतां ॥ उदीच्यां दिशि आप ओषधयो वनस्पतयो मार्जयंतां ॥ ऊ-
र्ध्वायां दिशि यज्ञः संवत्सरः प्रजापति मार्जयंतां ॥ प्रतिदिशं सिक्त्वा ॥ स्वशिरसि कुशाग्रै-
रभिषिंचेदेभिर्मंत्रैः ॥ आपो अस्मान्नित्यस्य देवश्रवा आपस्त्रिष्टुप् ॥ मार्जने विनि-
योगः ॥ ॐ आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु ॥ विश्वं हि रिप्रं प्रव-
हंति देवी रुदिदाभ्यः शुचिरापूत एमि ॥ इदमापः सिंधुद्वीप आपो नुष्टुप् मार्जने वि-
नियोगः ॥ ॐ इदमापः प्रवहत यत्किंच दुरितं मयि ॥ यद्वाहमभिदुद्रोह यद्वा शेप उता-
नृतं ॥ सुमित्र्या दुर्मित्र्या इति द्वयोः प्रजापति राापो गायत्री ॥ मार्जने वि॰ ॥ ॐ सुमित्र्या न

© Dharmartha Trust J&K. Digitized by eGangotri

॥९॥ आपऔषधयः संतु ॥ एतैर्मंत्रैस्तेमार्जनं कृत्वा ॥ दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यंच
वयंद्विष्मस्तं हन्मि ॥ इति नैर्ऋत्यां दिशि कुशाग्रैरपः सिंचेत् ॥ पत्न्यंजलौ प्रणीतापात्रास्थि
तं जलं ॥ माहं प्रजां परासिचं या नः सयावरी स्थन ॥ समुद्रे वो निनयानि स्वं पाथो अपी
थ ॥ इति रसिमार्जयेत् ॥ आपः समुद्रं गच्छेत् ॥ परिस्तरणीन्युत्तरे विसृजेत् ॥ पूर्ववित्स्यारिस
मूहनं ॥ पर्युक्षणं ॥ विश्वानि न इति अग्न्यर्चनं ॥ यस्मै त्वं सुकृत इति उपस्थाय ॥ ततोय
जमानो ग्नेर्वायव्यदेशोस्थितः संस्थाजयेनोपस्थाय ॥ अग्ने त्वन्न इति चतसृणां गो
पायनालौपायना वा बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुः श्चैक चत्वारऋषयः ॥ अग्निर्देवता द्वि
पदा विराट्छंदः ॥ अग्न्युपस्थाने विनियोगः ॥ ओं अग्ने त्वं नो अंतम उत त्राता शिवो भवा ॥७॥

© Dharmartha Trust J&K. Digitized by eGangotri

वरूथ्यः॥ वसुरग्निर्वसुश्रवा अच्छा नक्षिद्युमत्तमं रयिं दाः॥ स नो बोधि श्रुधी हवमुरुष्या णो

अघायतस्समस्मात्॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः॥ मा नस्तोके

तिकुत्सो रुद्रो जगती [illegible]॥ विभूतिग्रहणे विनियोगः॥ ॐ मा नस्तोके तनये मा न आ

यौ मा नो गोषु मा नो अश्वेषु रीरिषः॥ वीरान्मा नो रुद्र भामितो बधीर्हविष्मंतः सदमित्वा

हवामहे॥ त्र्यायुषं जमदग्नेर्ललाटे॥ कश्यपस्य त्र्यायुषं कंठे॥ अगस्त्यस्य त्र्यायुषं नाभौ॥ यद्दे स्य५ स्य५

वानां त्र्यायुषं दक्षिणस्कंधे॥ तन्मे अस्तु त्र्यायुषं वामस्कंधे॥ शतायुषं शिरसि॥ बलायु

षं सर्वांगे॥ ॐ च मे स्वरश्च मे यज्ञोप च ते नमश्च॥ यत्ते न्यूनं तस्मै त उपयत्ते अतिरिक्तं

तस्मै ते नमः॥ अग्नये नमः॥ स्वस्ति॥ श्रद्धां॥ मेधां यशः प्रज्ञां॥ विद्यां॥ बुद्धिं॥ श्रियं॥ बलं॥

© Dharmartha Trust J&K. Digitized by eGangotri

आयुष्यं॥ तेजश्‍आरोग्यं॥ देहि मे हव्यवाहनों नमो नमः॥ विभूतिधारणां कृत्वा॥ अग्नये नमः॥
यथामिलितोपचारैः संपूज्य॥ पुष्पादिभिरलंकृत्य॥ नैवेद्यं फलं तांबूलं दक्षिणां च निवेद्य
मंत्रपुष्पांजलिं॥ अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमं॥ अतूर्तंश्रावयत्पतिं पुत्रं ददाति
दाशुषे॥ अग्नये नमः मंत्रपुष्पांजलिं समर्पयामि॥ नमस्करोमि॥ कृतस्य पौर्णमासस्थालीपा
कहोमकर्मणः सांगतासिध्यर्थं ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दातुमहमुत्सृज्ये॥ तेन श्रीयज्ञ
पुरुषः प्रीयतां न मम॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु॥ न्यूनं संपूर्णतां याति
सद्यो वंदे तमच्युतं॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्॥ स्मरणादेव तद्विष्णोः संपू
र्णं स्यादिति श्रुतिः॥ कृतेनानेन यथाशक्ति यथाज्ञानेन कृतेन पौर्णमासस्थालीपाका॰

© Dharmartha Trust J&K. Digitized by eGangotri

स्येन कर्मणा तेन श्रीभगवान् यज्ञपुरुषः प्रीयतां न मम ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥
विष्णवे नमो त्रिः ॥ ॐ अनृणा अस्मिन्ननृणाः परस्मिंस्तृतीये लोके अनृणाः स्याम ॥ ये दे
वयाना उत पितृयाणाः सर्वान्पथो अनृणा आक्षीयेम ॥ यज्ञेश्वराय नमः ॥ श्री ॥ छ
॥ ॥ इति स्थालीपाकप्रयोगः समाप्तः ॥ ॥ ॥ ॥ ॥

११

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मकांड

स्थालिपाक

© Dharmartha Trust J&K. Digitized by eGangotri